# shrIjagadambA stutiH

# શ્રીજગદમ્બા સ્તુતિઃ

## Document Information

Text title : jagadambAstutiH 1

File name : jagadambAstutiH.itx

Category : aShTaka, devii, devI, pArvatI

Location : doc_devii

Proofread by : Jonathan Wiener wiener78 at sbcglobal.net, NA

Latest update : August 2, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 18, 2023

*sanskritdocuments.org*

# શ્રીજગદમ્બા સ્તુતિઃ

નમોઽસ્તુ તે ભગવતિ પાપનાશિનિ
નમોઽસ્તુ તે સુરરિપુદર્પશાતનિ ।
નમોઽસ્તુ તે હરિહરરાજ્યદાયિનિ
નમોઽસ્તુ તે મખભુજકાર્યકારિણિ ॥ ૧॥

નમોઽસ્તુ તે ત્રિદશરિપુક્ષયઙ્કરિ
નમોઽસ્તુ તે શતમખપાદપૂજિતે ।
નમોઽસ્તુ તે મહિષવિનાશકારિણિ
નમોઽસ્તુ તે હરિહરભાસ્કરસ્તુતે ॥ ૨॥

નમોઽસ્તુ તેઽષ્ટાદશબાહુશાલિનિ
નમોઽસ્તુ તે શુમ્ભનિશુમ્ભઘાતિનિ ।
નમોઽસ્તુ લોકાર્ત્તિહરે ત્રિશૂલિનિ
નમોઽસ્તુ નારાયણિ ચક્રધારિણિ ॥ ૩॥

નમોઽસ્તુ વારાહિ સદા ધરાધરે
ત્વાં નારસિંહિ પ્રણતા નમોઽસ્તુ તે ।
નમોઽસ્તુ તે વજ્રધરે ગજધ્વજે
નમોઽસ્તુ કૌમારિ મયૂરવાહિનિ ॥ ૪॥

નમોઽસ્તુ પૈતામહહંસવાહને
નમોઽસ્તુ માલાવિકટે સુકેશિનિ ।
નમોઽસ્તુ તે રાસભપૃષ્ઠવાહિનિ
નમોઽસ્તુ સર્વાર્તિહરે જગન્મયે ॥ ૫॥

નમોઽસ્તુ વિશ્વેશ્વરિ પાહિ વિશ્વં
નિષૂદયારીન્ દ્વિજદેવતાનામ્ ।
નમોઽસ્તુ તે સર્વમયિ ત્રિનેત્રે
નમો નમસ્તે વરદે પ્રસીદ ॥ ૬॥

બ્રહ્માણી ત્વં મૃડાની વરશિખિ-
ગમના શક્તિહસ્તા કુમારી
વારાહી ત્વં સુવક્ત્રા ખગપતિ-
ગમના વૈષ્ણવી ત્વં સશાર્ઙ્ગી ॥ ૭॥

દુર્દૃશ્યા નારસિંહી ઘુરઘુરિ-
તરવા ત્વં તથૈન્દ્રી સવજ્રા
ત્વં મારી ચર્મમુણ્ડા શવગમન-
રતા યોગિની યોગસિદ્ધા ।
નમસ્તે-
ત્રિનેત્રે ભગવતિ તવ ચરણાનુષિતા
યે અહરહર્વિનતશિરસોઽવનતાઃ
નહિ નહિ પરિભવમસ્ત્યશુભં ચ
સ્તુતિબલિકુસુમકરાઃ સતતં યે ॥ ૮॥

ઇતિ જગદમ્બા સ્તુતિઃ સમાપ્તા ।

Proofread by Jonathan Wiener wiener78 at sbcglobal.net, NA

*shrIjagadambA stutiH*

pdf was typeset on December 18, 2023

Please send corrections to *sanskrit@cheerful.com*